# ॥ आदिशंकराचार्यपूजाविधी ॥

.. AdishankarAchAryapUjAvidhI ..

sanskritdocuments.org

August 12, 2016

# .. AdishankarAchAryapUjAvidhI ..

# ॥ आदिशंकराचार्यपूजाविधी ॥

Document Information

Text title : Sri Adi Shankaracharya Puja Paddhati

File name : AdishankarAchAryapUjA.itx

Category : pUjA

Location : doc_z_misc_shankara

Author : Compiled by Harsha Ramamurthy (harshanandanatha)

Language : Sanskrit

Subject : philosophy/hinduism/religion

Transliterated by : Harsha Ramamurthy (harsha_ramamurthy at mail.com)

Description-comments : Traditional

Latest update : January 03, 2005

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 12, 2016

*sanskritdocuments.org*

# ॥ आदिशंकराचार्यपूजाविधी ॥

॥ श्रीशङ्करभगवत्पाद पूजाविधिः ॥

॥ श्रीमदखण्डवरसिद्धश्रीशङ्करानन्दनाथसद्गुरुश्रीपादुकाभ्यो नमः ॥

[भस्म - रुद्राक्षधारी उदङ्मुखः पूजोपकरणानि संभृत्य
पूजामारभेत् ]
ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभन्तरः शुचिः ॥

[आचम्य]
ॐ ध्रुवं ते राजा वरुणो ध्रुवं देवो बृहस्पतिः ।
ध्रुवन्त इन्द्रश्चाग्निश्च राष्ट्रं धारयतां
ध्रुवम् ॥

नमो ब्रह्मण्यदेव्याय गोब्राह्मणहिताय च ।
जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

गुरुर्ब्रह्मा गुरुर्विष्णुः गुरुदेवो महेश्वरः ।
गुरुः साक्षात्परं ब्रह्म तस्मै श्रीगुरवे नमः ॥

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः ।
लम्बोदरश्च विकटो विघ्नराजो गणाधिपः ॥

धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः ।
द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥

विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ।
सङ्ग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते ॥

अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरैरपि ।
सर्वविघ्नच्छिदे तस्मै गणाधिपतये नमः ॥

आगमार्थं तु देवानां गमनार्थं तु रक्षसाम् ।
देवतापूजनार्थाय घण्टानादं करोम्यहम् ॥ [इति घण्टानादं
कृत्वा]
भूतोत्सारणम्
अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः ।

ये भूता विघ्नकर्तारः ते नश्श्यन्तु शिवाज्ञया ॥

अपक्रामन्तु भूतानि पिशाचास्सर्वतो दिशम्।
सर्वेषामविरोधेन पूजाकर्म समारभे ॥

आसनविधिः
आसनमहामन्त्रस्य पृथिव्या मेरुपृष्ठः ऋषिः कूर्मो देवता
सुतलं छंदः आसने विनियोगः ॥

ॐ पृथ्वि त्वया धृता लोका देवि त्वं विष्णुना धृता ।
त्वं च धारय मां देवि पवित्रं कुरु चासनम् ॥

[मनुष्यगन्ध निवारणार्थं येभ्यो मातेति मन्त्रं जपेत्]
ॐ येभ्यो॑ मा॒ता मधु॑म॒त्पिन्व॑ते॒ पयः॑ पी॒यूषं॒
द्यौरदि॑ति॒रद्रि॑ बर्हाः । उ॒क्थ शु॑ष्मान्
वृ॒षभ॒रान्त्स्वप्न॑ स॒स्ताꣳ आ॒दि॒त्याꣳ अनु॑मदा
स्व॒स्तये॑ । ए॒वा पि॒त्रे वि॒श्वदे॑वा॒य वृष्णे॑
य॒ज्ञैर्वि॑धे॒म नम॑सा ह॒विर्भिः॑ । बृह॑स्पते सु॒प्रजा
वी॒रव॑न्तो व॒यं स्या॑म॒ पत॑यो र॒यी॒णाम् ॥

ॐ शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोऽपशान्तये ॥

[प्राणानायम्य]
[देशकालौ संकीर्त्य]ममोपात्त समस्त दुरितक्षयद्वारा
श्रीपरमेश्वर प्रीत्यर्थं अस्माकं सकुटुंबानां क्षेम स्थैर्य
विजय वीर्य अयुरारोग्यैश्वर्याभिवृद्ध्यर्थं
सर्वारिष्टशान्त्यर्थं सर्वाभीष्टसिद्ध्यर्थं
श्रीशङ्करभगवत्पाद प्रसाद सिद्ध्यर्थं श्रीशङ्कराचार्य
चरणारविन्दयोः अचञ्चल निष्काम निष्कपट भक्तिसिद्ध्यर्थं
यथाशक्ति ध्यानावाहनादि षोडशैरुपचारैः
श्रीमच्छङ्करभगवत्पाद पूजां करिष्ये ॥ तदङ्गत्वेन कलश
-शंख -आत्म -पीठ पूजां च करिष्ये ॥

॥ कलशार्चनम् ॥

श्रीकलशाय नमः । दिव्यगन्धान्धारयामि ॥

[कलशं गन्धाक्षत पत्र पुष्पैरभ्यर्च्य परिमलद्रव्याणि
निक्षिप्य कलशं हस्तेनाच्छाद्य]
ॐ कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः ।
मूले तत्र स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥

कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा ।
ऋग्वेदोऽथयजुर्वेदः सामवेदोऽप्यथर्वणः ॥

अङ्गैश्च सहिताः सर्वे कलशाम्बु समाश्रिताः ।
गायत्री चात्र सावित्री शान्तिः पुष्टिकरी तथा ॥

गङ्गे च यमुने चैव गोदावरि सरस्वति ।
नर्मदे सिन्धु कावेरि जलेऽस्मिन् सन्निधिं कुरु ॥

सर्वे समुद्राः सरितः तीर्थानि जलदा नदाः ।
आयान्तु गुरुपूजार्थं दुरितक्षयकारकाः ॥

ॐ आपो॒ वा इ॒दꣳ सर्वं॒ विश्वा॑ भू॒तान्यापः॑ । प्रा॒णा
वा आपः॑ प॒श॒व
आपोऽन्न॒मापोऽमृ॑त॒माप॑स्स॒म्राडापो॑
वि॒राडाप॑स्स्व॒राडाप॒श्छंदा॒ꣳ॒स्यापो॒
ज्योती॒ꣳ॒ष्यापो॒ यजू॒ꣳ॒ष्याप॑स्स॒त्यमाप॒स्सर्वा॑
दे॒वता॒ आपो॒ भूर्भुव॒स्सुव॒राप॒ ॐ ॥

ॐ इ॒मं मे॑ गङ्गे यमुने सरस्वति॒ शुतु॑द्रि स्तोमꣳ
सचता॒परु॒ष्णिया अ॒सि॒क्नि॒या म॑रुद्वृधे
वि॒तस्त॒यार्जी॑कीये शृणु॒ह्या सुषो॑मया ॥

सितमकरनिषण्णां शुभ्रवर्णां त्रिनेत्राम् ।
करधृतकलशोद्यत्सोत्पलाभीत्यभीष्टाम् ॥

विधिहरिहररूपां सेन्दुकोटीरचूडाम् ।
कलितसितदुकूलां जाह्नवीं तां नमामि ॥

[गायत्र्या दक्षिणामूर्तिमूलेन च दशवारमभिमन्त्र्य -
कलशमुखे पुष्पाणि निक्षिप्य - कलशोदकेन आत्मानं

सर्वोपकरणानि च प्रोक्षयेत्]
॥ शंखपूजा ॥

[कलशोदकेन भूर्भुवस्सुवरोऽमिति शंखं प्रक्षाळ्य -
चक्रमुद्रां प्रदर्श्य - गायत्र्या दक्षिणामूर्तिमूलेन च शंखं
कलशजलेनापूर्य - धेनुमुद्रां प्रदर्श्य - परिमलद्रव्याणि
निक्षिप्य - गन्धाक्षतपत्रपुष्पैः समभ्यर्चयेत्]
शंखमूले ब्रह्मणे नमः ।
शंखमध्ये जनार्दनाय नमः ।
शंखाग्रे चन्द्रशेखराय नमः ॥

[शंखं स्पृष्ट्वा]
शंखं चन्द्रार्कदैवत्यं मध्ये वरुणसंयुतम् ।
पृष्ठे प्रजापतिश्चैव अग्रे गङ्गा सरस्वती ॥

त्रैलोक्ये यानि तीर्थानि वासुदेवस्य चाज्ञया ।
शंखे तिष्ठन्ति विप्रेन्द्राः तस्माच्छंखं प्रपूजयेत् ॥

त्वं पुरा सागरोत्पन्नः विष्णुना विधृतः करे ।
पूजितः सर्वदेवैश्च पाञ्चजन्य नमोऽस्तुते ॥

गर्भा देवारिनारीणां विशीर्यन्ते सहस्रधा ।
तव नादेन पाताले पाञ्चजन्य नमोऽस्तुते ॥

दर्शनादेव शंखस्य किं पुनः स्पर्शनेन तु ।
विलयं यान्ति पापानि हिमवद्भास्करोदये ॥

नत्वा शंखं करे स्पृष्ट्वा मन्त्रैरेतस्तु वैष्णवैः ।
यः स्नापयति गोविन्दं तस्य पुण्यमनन्तकम् ॥

शंखमध्यस्थितं तोयं भ्रामितं केशवोपरि ।
अङ्गलग्नं मनुष्याणां ब्रह्महत्यायुतं दहेत् ॥

ॐ पाञ्चजन्याय विद्महे पावमानाय धीमहि तन्नः शंखः
प्रचोदयात् ॥

[इति शंखगायत्रीं दशवारं जपित्वा - शंखोदकेन किञ्चित्
कलशे निक्षिप्य - देवस्यार्घ्यं दत्वा - शंखोदकेन
पूजाद्रव्याणि आत्मानं च प्रोक्ष्य - शेषं विसृज्य - पुनः

शंखमापूर्य - गन्धादिभिरभ्यर्च्य - देवस्य दक्षिणदिग्भागे स्थापयेत्]
॥ श्रीमहागणपति पूजा ॥

आदौ निर्विघ्नता सिद्ध्यर्थं श्रीमहागणपतिपूजां करिष्ये ॥

ॐ गणानां त्वा गणपतिꣳ हवामहे कविं
कवीनामुपमश्रवस्तमम् । ज्येष्ठराजं ब्रह्मणां
ब्रह्मणस्पत आनः शृण्वन्नूतिभिस्सीद सादनम् ॥

श्रीमहागणपतये नमः - ध्यायामि । ध्यानं समर्पयामि ॥

श्रीमहागणपतये नमः - अवाहयामि ।
श्रीमहागणपतये नमः - आसनं कल्पयामि ।
श्रीमहागणपतये नमः - पादारविन्दयोः पाद्यं पाद्यं समर्पयामि ।
श्रीमहागणपतये नमः - हस्तेषु अर्घ्यमर्घ्यं समर्पयामि ।
श्रीमहागणपतये नमः - मुखारविन्दे आचमनीयमाचमनीयं समर्पयामि ।
श्रीमहागणपतये नमः - मलापकर्षणस्नानं समर्पयामि ।
श्रीमहागणपतये नमः - फलपञ्चामृतस्नानं समर्पयामि ।
श्रीमहागणपतये नमः - शुद्धोदकस्नानं समर्पयामि ।
श्रीमहागणपतये नमः - स्नानाङ्गमाचमनीयमाचमनीयं समर्पयामि ।
श्रीमहागणपतये नमः - वस्त्रयुग्मं समर्पयामि ।
श्रीमहागणपतये नमः - आचमनीयमाचमनीयं समर्पयामि ।
श्रीमहागणपतये नमः - यज्ञोपवीतं समर्पयामि ।
श्रीमहागणपतये नमः - आचमनीयमाचमनीयं समर्पयामि ।
श्रीमहागणपतये नमः - आभरणानि समर्पयामि ।
श्रीमहागणपतये नमः - दिव्यगन्धान्धारयामि ।
श्रीमहागणपतये नमः - अक्षतान् समर्पयामि ।
॥अथ नामपूजा ॥

ॐ सुमुखाय नमः ।
ॐ एकदन्ताय नमः ।

ॐ कपिलाय नमः ।
ॐ गजकर्णकाय नमः ।
ॐ लम्बोदराय नमः ।
ॐ विकटाय नमः ।
ॐ विघ्नराजाय नमः ।
ॐ गणाधिपाय नमः ।
ॐ धूम्रकेतवे नमः ।
ॐ गणाध्यक्षाय नमः ।
ॐ फालचन्द्राय नमः ।
ॐ गजाननाय नमः ।
श्रीमहागणपतये नमः - नानाविध परिमलपत्रपुष्पाणि
समर्पयामि ॥

श्रीमहागणपतये नमः - धूपमाघ्रापयामि ।
श्रीमहागणपतये नमः - दीपं दर्शयामि ।
श्रीमहागणपतये नमः - धूपदीपानन्तरं
आचमनीयमाचमनीयं समर्पयामि ।
श्रीमहागणपतये नमः - अमृतनैवेद्यं समर्पयामि ।
श्रीमहागणपतये नमः - ताम्बूलं समर्पयामि ।
श्रीमहागणपतये नमः - दिव्यमङ्गलनीराजनं दर्शयामि ।
ॐ नमो व्रातपतये नमो गणपतये नमः प्रमथपतये नमस्तेऽस्तु
लम्बोदरायैकदन्ताय विघ्नविनाशिने शिवसुताय श्रीवरदमूर्तये
नमो नमः ॥

श्रीमहागणपतये नमः - मन्त्रपुष्पं समर्पयामि ॥

श्रीमहागणपतये नमः - प्रदक्षिणनमस्कारान् समर्पयामि ।
श्रीमहागणपतये नमः - प्रसन्नार्घ्यं समर्पयामि ।
वक्रतुण्ड महाकाय सूर्यकोटिसमप्रभ ।
निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

श्रीमहागणपतये नमः - प्रार्थयामि ।
श्रीमहागणपतये नमः - समस्तोपचारपूजाः समर्पयामि ।
अनया पूजया श्रीमहागणपतिः प्रीयताम् ॥

॥ आत्मपूजा ॥

आत्मने नमः - दिव्यगन्धान् धारयामि ॥

आत्मने नमः ।
अन्तरात्मने नमः ।
जीवात्मने नमः ।
योगात्मने नमः ।
परमात्मने नमः ।
ज्ञानात्मने नमः - समस्तोपचारान् समर्पयामि ॥

देहो देवालयः प्रोक्तः जीवो देवः सनातनः ।
त्यजेदज्ञाननिर्माल्यं सोऽहं भावेन पूजयेत् ॥

आराधयामि मणिसन्निभमात्मलिङ्गं
मायापुरीहृदयपङ्कजसन्निविष्टम् ।
श्रद्धानदीविमलचित्तजलाभिषेकैः नित्यं
समाधिकुसुमैरपुनर्भवाय ॥

॥ मण्टपध्यानम् ॥

उत्तप्तोज्ज्वलकाञ्चनेन रचितं तुङ्गाङ्गरङ्गस्थलम् ।
शुद्धस्फाटिकभित्तिकाविरचितैः स्तम्भैश्च हेमैश्शुभैः ॥

द्वारैश्चामररत्नराजखचितैः वज्रैश्च सोपानकैः ।
नानारत्नविचित्रस्वर्णकलशैः ध्यायेन्महामण्टपम् ॥

॥द्वारदेवता पूजा॥

ॐ पूर्वद्वारे द्वारश्रियै नमः - ॐ धात्रे नमः । ॐ विधात्रे नमः ॥

ॐ दक्षिणद्वारे द्वारश्रियै नमः - ॐ जयाय नमः । ॐ विजयाय नमः ॥

ॐ पश्चिमद्वारे द्वारश्रियै नमः - ॐ चण्डाय नमः । ॐ प्रचण्डाय नमः ॥

ॐ उत्तरद्वारे द्वारश्रियै नमः - ॐ नन्दाय नमः । ॐ सुनन्दाय नमः ॥

ॐ ऊर्ध्वद्वारे द्वारश्रियै नमः - ॐ आकाशाय नमः । ॐ अन्तरिक्षाय नमः ॥

ॐ अधोद्वारे द्वारश्रियै नमः - ॐ भूम्यै नमः । ॐ पातालाय नमः ॥

ॐ पूर्वे धर्माय नमः ।
ॐ दक्षिणे ज्ञानाय नमः ।
ॐ पश्चिमे वैराग्याय नमः ।
ॐ उत्तरे ऐश्वर्याय नमः ॥

॥ अष्टदिक्पाल पूजा ॥

ॐ इन्द्राय नमः ।
ॐ अग्नये नमः ।
ॐ यमाय नमः ।
ॐ निर्ऋतये नमः ।
ॐ वरुणाय नमः ।
ॐ वायवे नमः ।
ॐ कुबेराय नमः ।
ॐ ईशानाय नमः ॥

॥ पीठपूजा ॥

ॐ आधारशक्त्यै नमः ।
ॐ मूलप्रकृत्यै नमः ।
ॐ आदिकूर्माय नमः ।
ॐ वराहाय नमः ।
ॐ अनन्ताय नमः ।
ॐ अष्टदिग्गजेभ्यो नमः ।
ॐ क्षीरार्णवाय नमः ।
ॐ श्वेतद्वीपाय नमः ।
ॐ कल्पवृक्षाय नमः ।
ॐ सुवर्णमण्टपाय नमः ।
ॐ सं सत्वाय नमः ।
ॐ रं रजसे नमः ।

ॐ तं तमसे नमः ।
ॐ वह्निमण्डलाय नमः ।
ॐ सूर्यमण्डलाय नमः ।
ॐ सोममण्डलाय नमः ।
ॐ ह्रीं ज्ञानात्मने नमः ।
ॐ चतुर्दशलोकेभ्यो नमः ।
ॐ सप्तसागरेभ्यो नमः ।
ॐ अङ्कुराय नमः ।
ॐ नाळाय नमः ।
ॐ पत्रेभ्यो नमः ।
ॐ केसरेभ्यो नमः ।
ॐ दलेभ्यो नमः ॥

ध्यानम्
कैलासाचलमध्यस्थं कामिताभीष्टदायकम् ।
ब्रह्मादिप्रार्थनाप्राप्त दिव्यमानुषविग्रहम् ॥

भक्तानुग्रहणैकान्त शान्त स्वान्त समुज्ज्वलम् ।
सर्वज्ञं संयमीन्द्राणां सार्वभौमं जगद्गुरुम् ॥

किङ्करीभूतभक्तैनः पङ्कजातविशोषणम् ।
ध्यायामि शङ्कराचार्यं सर्वलोकैकशङ्करम् ॥

चिन्मुद्रां दक्षहस्ते प्रणतजनमहाबोधदात्रीं दधानम् ।
वामे नम्रेष्टदान प्रकटनचतुरं चिह्नमप्यादधानम् ॥

कारुण्यापारवार्धिं यतिवरवपुषं शङ्करं शङ्करांशम् ।
चन्द्राहङ्कारहुङ्कृत् स्मितलसितमुखं भावयाम्यन्तरङ्गे ॥

अस्मिन् बिंबमध्ये श्रीशङ्करभगवत्पादाचार्यस्वामिनं ध्यायामि
॥

आवाहनम्
ॐ स॒हस्र॑शीर्षा॒ पुरु॑षः स॒ह॒स्रा॒क्षः स॒हस्र॑पात् ।
स भूमिं॑ वि॒श्वतो॑ वृ॒त्वा अत्य॑तिष्ठद्दशाङ्गु॒लम् ॥

सद्गुरो शङ्कराचार्य रूपान्तरितविग्रह ।

साक्षाच्छ्रीदक्षिणामूर्ते कृपयाऽऽवाहितो भव ॥

अस्मिन् बिंबमध्ये श्रीशङ्करभगवत्पादाचार्यस्वामिनं आवाहयामि ॥

आसनम्

ॐ पुरुष एवेदꣳ सर्वं यद्भूतं यच्च भव्यम् ।
उतामृतत्वस्येशानो यदन्नेनातिरोहति ॥

आर्याम्बा गर्भसम्भूत मातृवात्सल्यभाजन ।
जगद्गुरुददाम्येतद्रत्नसिंहासनं शुभम् ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - रत्नसिंहासनं समर्पयामि ॥

पाद्यम्

ॐ एतावानस्य महिमा अतो ज्यायाꣳश्च पूरुषः ।
पादोऽस्य विश्वा भूतानि त्रिपादस्यामृतं दिवि ॥

विद्यधिराजसत्पौत्र विद्याव्यासङ्गतत्पर ।
विश्वविख्यात वैदुष्य पाद्यमेतद्ददाम्यहम् ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - पादारविन्दयोः पाद्यं पाद्यं समर्पयामि ॥

अर्घ्यम्

ॐ त्रिपादूर्ध्व उदैत्पुरुषः
पादोऽस्येहाभवात्पुनः ।
ततो विश्वं व्यक्रामत् साशनानशने अभि ॥

शिवगुर्वन्वयाम्बोधि शरत्पर्वनिशाकर ।
शिवावतार भगवन् गृहाणार्घ्यं नमोऽस्तुते ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - हस्तयोः अर्घ्यमर्घ्यं समर्पयामि ॥

आचमनम्

तस्माद्विराडजायत विराजो अधि पूरुषः ।
स जातो अत्यरिच्यत पश्चाद्भूमिमथो पुरः ॥

दरिद्रब्राह्मणीसद्म स्वर्णामलकवर्षक ।
विस्मापकस्वात्मवृत्त ददाम्याचमनीयकम् ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - मुखारविन्दे
आचमनीयमाचमनीयं समर्पयामि ॥

॥ मधुपर्कम् ॥

ॐ मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः ।
माध्वीर्नः सन्त्वोषधीः ।
मधुमक्तमुतोषसि मधुमत्पार्थिवꣳ रजः ।
मधु द्यौरस्तु नः पिता ।
मधुमान्नो वनस्पतिर्मधुमाꣳ अस्तु सूर्यः ।
माध्वीर्गावो भवन्तु नः ॥

जननीसमनुज्ञात सन्यासाश्रमसङ्ग्रह ।
गन्धर्वशापशमन मधुपर्कं ददामि ते ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - मधुपर्कं
समर्पयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः -
आचमनीयमाचमनीयं समर्पयामि ॥

॥ स्नानम् ॥

ॐ यत्पुरुषेण हविषा देवा यज्ञमतन्वत ।
वसन्तो अस्यासीदाज्यं ग्रीष्म इध्मश्शरद्धविः ॥

ॐ आपो हि ष्ठा मयोभुवस्तान ऊर्जे दधातन ।
महेरणाय चक्षसे । यो वः शिवतमो रसस्तस्य
भाजयतेह नः । उशतीरिव मातरः । तस्मा अरङ्ग
मामवो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः
॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः -
मलापकर्षणस्नानं समर्पयामि ॥

ॐ आप्यायस्व समेतु ते विश्वतः सोम वृष्णियम् ।
भवा वाजस्य संगथे ॥

ॐ सद्योजातं प्रपद्यामि सद्योजाताय वै नमो नमः
। भवे भवे नाति भवे भवस्व मां भवोद्भवाय
नमः ॥

कामधेनोस्समुद्भूतं देवर्षिपितृतृप्तिदम् ।
पयो ददामि देवेश स्नानार्थं प्रतिगृह्यताम् ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - क्षीरस्नानं
समर्पयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - शुद्धोदकस्नानं
समर्पयामि ॥

ॐ दधिक्राव्णो अकारिषं जिष्णोरश्वस्य वाजिनः ।
सुरभिनो मुखा करत्प्रण अयूꣳषि तारिषत् ॥

ॐ वामदेवाय नमो ज्येष्ठाय नमः श्रेष्ठाय
नमो रुद्राय नमः कालाय नमः कलविकरणाय
नमो बलविकरणाय नमो बलाय नमो बलप्रमथनाय
नमस्सर्वभूतदमनाय नमो मनोन्मनाय नमः ॥

चन्द्रमण्डलसङ्काशं सर्वदेवप्रियं दधि ।
स्नानार्थं ते मया दत्तं प्रीत्यर्थं प्रतिगृह्यताम् ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - दधिस्नानं
समर्पयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - शुद्धोदकस्नानं
समर्पयामि ॥

ॐ शुक्रमसि ज्योतिरसि तेजोऽसि देवो

वस्सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोस्सूर्यस्य
रश्मिभिः ॥

ॐ अघोरेभ्योऽथ घोरेभ्यो घोरघोरतरेभ्यः ।
सर्वेभ्यस्सर्वशर्वेभ्यो नमस्ते अस्तु रुद्ररूपेभ्यः ॥

आज्यं सुराणामाहारः आज्यं यज्ञे प्रतिष्ठितम् ।
आज्यं पवित्रं परमं स्नानार्थं प्रतिगृह्यताम् ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - आज्यस्नानं
समर्पयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - शुद्धोदकस्नानं
समर्पयामि ॥

ॐ मधुवाता ऋतायते मधु क्षरन्ति सिन्धवः ।
माध्वीर्नः सन्त्वोषधीः ।
मधुमक्तमुतोषसि मधुमत्पार्थिवꣳ रजः ।
मधु द्यौरस्तु नः पिता ।
मधुमान्नो वनस्पतिर्मधुमाꣳ अस्तु सूर्यः ।
माध्वीर्गावो भवन्तु नः ॥

ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः
प्रचोदयात् ॥

सर्वौषधिसमुत्पन्नं पीयूषसदृशं मधु ।
स्नानार्थं ते प्रयच्छामि गृहाण परमेश्वर ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - मधुस्नानं
समर्पयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - शुद्धोदकस्नानं
समर्पयामि ॥

ॐ स्वादुः पवस्व दिव्याय जन्मने स्वादुरिन्द्राय
सुहवीतु नाम्ने ।
स्वादुर्मित्राय वरुणाय वायवे बृहस्पतये

मधु॑मा॒ꣳ॒ अदा॒॑भ्यः ॥

ॐ ई॒शानस्स॑र्ववि॒द्या॒नामी॑श्वरस्स॒र्व॑भू॒ता॒नां॑
ब्रह्माऽधि॑पति॒र्ब्रह्म॒णोऽधि॑पति॒र्ब्रह्मा॑ शि॒वो॑ मे॒॑ अस्तु
सदाशि॒वोम् ॥

इक्षुदण्दसमुद्भूत दिव्यशर्करया गुरुम् ।
स्नपयामि सदा भक्त्या प्रीतो भव महेश्वर ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - शर्करास्नानं
समर्पयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - शुद्धोदकस्नानं
समर्पयामि ॥

ॐ याः फ॒लिनी॒र्या अ॑फ॒ला अ॑पु॒ष्पा याश्च॑
पु॒ष्पिणीः॑ ।
बृ॒ह॒स्पति॑ प्रसू॒तास्तानो॑ मुं॒चंत्व॒ꣳ॒ हं॑सः ॥

फलेन फलितं सर्वं त्रैलोक्यं सचराचरम् ।
तस्मादस्याभिषेकेण सफलास्युर्मनोरथाः ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - नारिकेळ
फलोदकस्नानं समर्पयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - शुद्धोदकस्नानं
समर्पयामि ॥

गोविन्दभगवत्पाद पादसेवादुरन्धर ।
महावाक्योपदेशाढ्य स्नाहि पञ्चामृतद्रवैः ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः -
फलपञ्चामृतस्नानं समर्पयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - शुद्धोदकस्नानं
समर्पयामि ॥

ॐ ओष॑धयः॒ सं व॑दन्ते॒ सोमे॑न स॒हराज्ञा॑ । यस्मै॑
क॒रोति॑ ब्राह्म॒णस्त॒ꣳ॒ रा॑जन् पारयामसि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - ओषधिस्नानं समर्पयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - शुद्धोदकस्नानं समर्पयामि ॥

ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां
करीषिणीम् ।
ईश्वरीꣳसर्वभूतानां तामिहोपह्वये श्रियम् ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - गन्धोदकस्नानं समर्पयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - शुद्धोदकस्नानं समर्पयामि ॥

ॐ आयनेते परायणे दूर्वा रोहन्तु पुष्पिणीः ।
ह्रदाश्च पुण्डरीकाणि समुद्रस्य गृहा इमे ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - पुष्पोदकस्नानं समर्पयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - शुद्धोदकस्नानं समर्पयामि ॥

ॐ उपास्मै गायता नरः पवमानायेन्दवे ।
अभिदेवाꣳ इयक्षते ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - अक्षतोदकस्नानं समर्पयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - शुद्धोदकस्नानं समर्पयामि ॥

ॐ तथ्सुवर्णꣳ हिरण्यमभवत् । तथ्सुवर्णस्य
हिरण्यस्य जन्म । य एवꣳ सुवर्णस्य हिरण्यस्य
जन्म वेद । सुवर्ण आत्मना भवति ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - सुवर्णोदकस्नानं

समर्पयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - शुद्धोदकस्नानं समर्पयामि ॥

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय
माऽमृतात् ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - रुद्राक्षोदकस्नानं समर्पयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - शुद्धोदकस्नानं समर्पयामि ॥

ॐ मा नस्तोके तनये मान आयुषि मा नो गोषु मा
नो अश्वेषु रीरिषः । वीरान्मानो रुद्र भामितो
वधीर्हविष्मन्तो नमसा विधेम ते ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - भस्मस्नानं समर्पयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - शुद्धोदकस्नानं समर्पयामि ॥

ॐ नमो बिल्मिने च कवचिने च नमः श्रुताय च
श्रुतसेनाय च ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - बिल्वोदकस्नानं समर्पयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - शुद्धोदकस्नानं समर्पयामि ॥

ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषः परि ।
एवा नो दूर्वे प्रतनु सहस्रेण शतेन च ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - दूर्वोदकस्नानं समर्पयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - शुद्धोदकस्नानं समर्पयामि ॥

ॐ आपो हि ष्ठा मयोभुवस्तान ऊर्जे दधातन ।
महेरणाय चक्षसे । यो वः शिवतमो रसस्तस्य
भाजयतेह नः । उशतीरिव मातरः । तस्मा अरङ्ग
मामवो यस्य क्षयाय जिन्वथ । आपो जनयथा च नः
॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - शुद्धोदकस्नानं समर्पयामि ॥

॥ अभिषेकः ॥

वाराणसीपुरी रम्यगङ्गातीरनिषेवक ।
गङ्गादितीर्थैः श्रीरुद्रमन्त्रैस्त्वां स्नपयाम्यहम् ॥

ॐ तच्छं योरावृणीमहे । गातुं यज्ञाय। गातुं
यज्ञपतये । दैवीस्वस्तिरस्तु नः । स्वस्तिर्मानुषेभ्यः ।
ऊर्ध्वं जिगातु भेषजम् । शन्नो अस्तु द्विपदे। शं
चतुष्पदे । ॐ शान्तिश्शान्तिश्शान्तिः ॥

ॐ सहस्रशीर्षा पुरुषः । सहस्राक्षः
सहस्रपात् । स भूमिं विश्वतो वृत्वा ।
अत्यतिष्टद्दशाङ्गुलम् । पुरुष एवेदꣳ सर्वम् ।
यद्भूतं यच्च भव्यम्। उतामृतत्वस्येषानः ।
यदन्नेनातिरोहति । एतावानस्य महिमा । अतो
ज्यायाꣳश्च पूरुषः। पादोऽस्य विश्वा भूतानि
। त्रिपादस्यामृतं दिवि । त्रिपादूर्ध्व
उदैत्पुरुषः । पादोऽस्येहाऽऽभवात्पुनः । ततो
विश्वङ्व्यक्रामत् । साशनानशने अभि ।
तस्माद्विराडजायत । विराजो अधि पूरुषः । स जातो
अत्यरिच्यत । पश्चाद्भूमिमथो पुरः । यत्पुरुषेण

हविषा । देवा यज्ञमतन्वत । वसन्तो
अस्यासीदाज्यम्। ग्रीष्म इध्मश्शरद्धविः ।
सप्तास्यासन् परिधयः । त्रिस्सप्त समिधः कृताः ।
देवा यद्यज्ञं तन्वानाः । अबध्नन् पुरुषं पशुम् ।
तं यज्ञं बर्हिषि प्रौक्षन्। पुरुषं
जातमग्रतः । तेन देवा अयजन्त । साध्या
ऋषयश्च ये । तस्माद्यज्ञाथ्सर्व हुतः ।
संभृतं पृषदाज्यम् । पशूँस्ताँश्चक्रे
वायव्यान् । आरण्यान् ग्राम्याश्च ये ।
तस्माद्यज्ञाथ्सर्वहुतः । ऋचस्सामानि जज्ञिरे ।
छन्दाँसि जज्ञिरे तस्मात् । यजुस्तस्मादजायत ।
तस्मादश्वा अजायन्त । ये के चोभयादतः । गावो ह
जज्ञिरे तस्मात् । तस्माज्जाता अजावयः ।
यत्पुरुषं व्यदधुः । कतिधा व्यकल्पयन् । मुखं
किमस्य कौ बाहू । कावूरू पादावुच्येते ।
ब्राह्मणोऽस्य मुखमासीत् । बाहू राजन्यः कृतः
। ऊरू तदस्य यद्वैश्यः । पद्भ्याँ शूद्रो अजायत
। चन्द्रमा मनसो जातः । चक्षोस्सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च । प्राणाद्वायुरजायत ।
नाभ्या आसीदन्तरिक्षम् । शीर्ष्णो द्यौस्समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात् । तथा लोकाँ
अकल्पयन् । वेदाहमेतं पुरुषं महान्तम् ।
आदित्यवर्णं तमसस्तु पारे। सर्वाणि रूपाणि
विचित्य धीरः । नामानि कृत्वाऽभिवदन् यदास्ते।
धाता पुरस्ताद्यमुदाजहार । शक्रः प्रविद्वान्
प्रदिशश्चतस्रः । तमेवं विद्वानमृत इह
भवति । नान्यः पन्था अयनाय विद्यते । यज्ञेन

यज्ञमयजन्त देवाः । तानि धर्माणि प्रथमान्यासन् ।
ते ह नाकं महिमानस्सचन्ते । यत्र पूर्वे
साध्यास्सन्ति देवाः ।
अद्भ्यः संभूतः पृथिव्यै रसाच्च ।
विश्वकर्मणस्समवर्तताधि । तस्य त्वष्टा
विदधद्रूपमेति । तत्पुरुषस्य विश्वमाजानमग्रे
। वेदाहमेतं पुरुषं महान्तम्। आदित्यवर्णं
तमसः परस्तात्। तमेवं विद्वानमृत इह भवति ।
नान्यः पन्था विद्यतेऽनाय । प्रजापतिश्चरति
गर्भे अन्तः । अजायमनो बहुधा विजायते। तस्य
धीराः परिजानन्ति योनिम्। मरीचीनां पदमिच्छन्ति
वेधसः॥ यो देवेभ्य आतपति । यो देवानां
पुरोहितः। पूर्वो यो देवेभ्यो जातः । नमो रुचाय
ब्राह्मये। रुचं ब्राह्मम् जनयन्तः । देवा अग्रे
तदब्रुवन्। यस्त्वैवं ब्राह्मणो विद्यात् । तस्य देवा
असन् वशे। ह्रीश्च ते लक्ष्मीश्च पत्न्यौ।
अहोरात्रे पार्श्वे। नक्षत्राणि रूपम् । अश्विनौ
व्यात्तम्। इष्टम् मनिषाण । अमुं मनिषाण। सर्वम्
मनिषण ॥

तच्छं योरावृणीमहे । गातुं यज्ञाय। गातुं
यज्ञपतये । दैवीस्वस्तिरस्तु नः । स्वस्तिर्मानुषेभ्यः ।
ऊर्ध्वं जिगातु भेषजम् । शन्नो अस्तु द्विपदे। शं
चतुष्पदे । ॐ शान्तिश्शान्तिश्शान्तिः ॥

ॐ नमः सोमाय च रुद्राय च नमस्ताम्राय
चारुणाय च नमः शङ्गाय च पशुपतये च
नम उग्राय च भीमाय च नमो अग्रेवधाय च
दूरेवधाय च नमो हन्त्रे च हनीयसे च नमो

वृक्षेभ्यो हरिकेशेभ्यो नमस्ताराय
नमश्शंभवे च मयोभवे च नमः शंकराय च
मयस्कराय च नमः शिवाय च शिवतराय च
नमस्तीर्थ्याय च कूल्याय च नमः पार्याय
चावार्याय च नमः प्रतरणाय चोत्तरणाय च
नम आतार्याय चालाद्याय च नमः शष्प्याय
च फेन्याय च नमः सिकत्याय च प्रवाह्याय च ॥

ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय
माऽमृतात् ॥

ॐ यो रुद्रो अग्नौ यो अप्सु य ओषधीषु यो रुद्रो विश्वा
भुवनाऽऽविवेश तस्मै रुद्राय नमो अस्तु ॥

ये ते सहस्रमयुतं पाशा मृत्यो मर्त्याय हन्तवे
। तान् यज्ञस्य मायया सर्वानव यजामहे । मृत्यवे
स्वाहा मृत्यवे स्वाहा ॥ ॐ नमो भगवते रुद्राय विष्णवे
मृत्युर्मे पाहि । प्राणानां ग्रन्थिरसि रुद्रो मा विशान्तकः
। तेनान्नेनाप्यायस्व ॥ ६॥ नमो रुद्राय विष्णवे मृत्युर्मे
पाहि । सदाशिवोम् ॥

ॐ शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे
कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च
मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च
मे यन्ता च मे धर्ता च मे क्षेमश्च मे धृतिश्च
मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च
मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म
ऋतं च मेऽमृतं च मेऽयक्ष्मं च मेऽनामयच्च
मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च
मेऽभयं च मे सुगं च मे शयनं च मे सूषा च

मे सुदिनं च मे ॥

ॐ इडा देवहूर्मनुर्यज्ञनीर्बृहस्पतिरुक्थामदानि
शꣳसिषद्विश्वेदेवाः सूक्तवाचः
पृथिवीमातर्मा मा हिꣳसीर्मधु मनिष्ये मधु
जनिष्ये मधु वक्ष्यामि मधु वदिष्यामि मधुमतीं
देवेभ्यो वाचमुद्यासꣳ शुश्रूषेण्यां
मनुष्येभ्यस्तं मा देवा अवन्तु शोभायै
पितरोऽनुमदन्तु ॥ ॐ शान्तिः शान्तिः शान्तिः ॥

ॐ हिरण्यवर्णां हरिणीं सुवर्णरजतस्रजाम् ।
चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ १॥

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं विन्देयं गामश्वं पुरुषानहम् ॥ २ ॥

अश्वपूर्वां रथमध्यां हस्तिनादप्रबोधिनीम् ।
श्रियं देवीमुपह्वये श्रीर्मा देवी जुषताम् ॥ ३ ॥

कां सोस्मितां हिरण्यप्राकारामार्द्रां ज्वलन्तीं
तृप्तां तर्पयन्तीम् । पद्मेस्थितां पद्मवर्णां
तामिहोपह्वये श्रियम् ॥ ४ ॥

चन्द्रां प्रभासां यशसा ज्वलन्तीं श्रियं लोके
देवजुष्टामुदाराम् । तां पद्मिनीमीं शरणमहं
प्रपद्येऽलक्ष्मीर्मे नश्यतां त्वां वृणे ॥ ५ ॥

आदित्यवर्णे तपसोऽधिजातो वनस्पतिस्तव
वृक्षोऽथ बिल्वः । तस्य फलानि तपसानुदन्तु
मायान्तरायाश्च बाह्या अलक्ष्मीः ॥ ६ ॥

उपैतु मां देवसखः कीर्तिश्च मणिना सह ।
प्रादुर्भूतोऽस्मि राष्ट्रेऽस्मिन् कीर्तिमृद्धिं
ददातु मे ॥ ७ ॥

क्षुत्पिपासामलां ज्येष्ठामलक्ष्मीं नाशयाम्यहम् ।
अभूतिमसमृद्धिं च सर्वां निर्णुदमे गृहात् ॥

८ ॥

गंधद्वारां दुराधर्षां नित्यपुष्टां
करीषिणीम् । ईश्वरीं सर्वभूतानां
तामिहोपह्वये श्रियम् ॥ ९ ॥

मनसः काममाकूतिं वाचः सत्यमशीमहि ।
पशूनां रूपमन्नस्य मयि श्रीः श्रयतां यशः
॥ १० ॥

कर्दमेन प्रजाभूतामयि सम्भव कर्दम । श्रियं
वासय मे कुले मातरं पद्ममालिनीम् ॥ ११ ॥

आपः सृजन्तु स्निग्धानि चिक्लीत वसमे गृहे । नि
च देवीं मातरं श्रियं वासय मे कुले ॥ १२ ॥

आर्द्रां पुष्करिणीं पुष्टिं सुवर्णां हेममालिनीम् ।
सूर्यां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ १३ ॥

आर्द्रां यः करिणीं यष्टिं पिङ्गलां पद्ममालिनीम्
। चन्द्रां हिरण्मयीं लक्ष्मीं जातवेदो म आवह ॥ १४
॥

तां म आवह जातवेदो लक्ष्मीमनपगामिनीम् ।
यस्यां हिरण्यं प्रभूतं गावोदास्योऽश्वान्
विन्देयं पुरुषानहम् ॥ १५ ॥

महादेव्यै च विद्महे विष्णुपत्न्यै च धीमहि तन्नो
लक्ष्मीः प्रचोदयात् ॥

ॐ जातवेदसे सुनवाम सोममरातीयतो निदहाति वेदः
।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं
दुरितात्यग्निः ॥ १॥

तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं
कर्मफलेषु जुष्टाम् ।
दुर्गां देवीँ शरणमहं प्रपद्ये सुतरसितरसे
नमः ॥ २॥

अग्ने त्वं पारयानव्यो अस्मान् स्वस्तिभिरति दुर्गाणि
विश्वा ।
पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय
तनयाय शं योः ॥ ३॥

विश्वानि नो दुर्गहा जातवेदस्सिन्धुन्ननावा
दुरिताऽतिपर्षि ।
अग्ने अत्रिवन्मनसा गृणानोऽस्माकं बोध्यविता
तनूनाम् ॥ ४॥

पृतनाजितँ सहमानमुग्रमग्निँ हुवेम
परमाथ्सधस्थात् ।
स नः पर्षदति दुर्गाणि विश्वा क्षामद्देवो अति
दुरितात्यग्निः ॥ ५॥

प्रत्नोषिकमीड्यो अध्वरेषु सनाच्च होता
नव्यश्च सथ्सि ।
स्वाश्चाग्ने तनुवं पिप्रयस्वास्मभ्यं च
सौभगमायजस्व ॥ ६॥

गोभिर्जुष्टमयुजो निषिक्तं तवेन्द्र
विष्णोरनुसञ्चरेम ।
नाकस्य पृष्ठमभिसंवसानो वैष्णवीं लोक
इहमादयन्ताम् ॥ ७॥

कात्यायनाय विद्महे कन्यकुमारि धीमहि तन्नो
दुर्गिः प्रचोदयात् ॥

ॐ भूर्भुवस्स्वः । अमृताभिषेकोऽस्तु ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः -
स्नानाङ्गमाचमनीयमाचमनीयं समर्पयामि ॥

वस्त्रयुग्मम्
ॐ सप्तास्यासन् परिधयः । त्रिस्सप्त समिधः कृताः
। देवा यद्यज्ञं तन्वानाः । अबध्नन् पुरुषं पशुम्
।
भाष्यभागीरथीपाथः पवित्रीकृतभूतल ।
भाष्यप्रवचनासक्त वस्त्रयुग्मं ददामि ते ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - वस्त्रयुग्मं
समर्पयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः -
आचमनीयमाचमनीयं समर्पयामि ॥

श्रीगन्धम्
ॐ तं यज्ञं बर्हिषि प्रौक्ष्हन्। पुरुषं
जातमग्रतः । तेन देवा अयजन्त । साध्या
ऋषयश्च ये । तस्माद्यज्ञाथ्सर्व हुतः ।
संभृतं पृषदाज्यम् । पशूँ स्ताँ श्चक्रे
वायव्यान् । आरण्यान् ग्राम्याश्च ये ।
गंधद्वारां दुराधर्षां नित्यपुष्टां
करीषिणीम् । ईश्वरीं सर्वभूतानां
तामिहोपह्वये श्रियम् ॥

सनन्दनादि मेधाविपण्डितच्छात्र संवृत ।
सर्वशास्त्रार्थनिपुण गन्धान् धारय सादरम् ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः -
दिव्यगन्धान्धारयामि ॥

अक्षतम्
ॐ तस्माद्यज्ञाथ्सर्वहुतः । ऋचस्सामानि जज्ञिरे ।

छन्दा॑ꣳसि जज्ञिरे॒ तस्मा॑त् । यजु॒स्तस्मा॑दजायत ।
आय॑नेते परा॑य॒णे दूर्वा॑ रोहन्तु॒ पुष्पिणी॑ः ।
ह्र॒दाश्च॑ पु॒ण्डरी॑काणि समु॒द्रस्य॑ गृ॒हा इ॒मे ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - गन्धस्योऽपरि
अलङ्करणार्थे अक्षतान् समर्पयामि ॥

भस्मोद्धूलनम्
ॐ मा न॑स्तो॒के तन॑ये॒ मान॒ आयु॑षि॒ मा नो॒ गोषु॒ मा
नो॒ अश्वे॑षु रीरिषः । वी॒रान्मानो॑ रुद्र भामि॒तो
व॑धीर्ह॒विष्मन्तो॒ नम॑सा विधेम ते ॥

वृद्धवेषप्रतिच्छन्न व्याससन्दर्शनोत्सुक ।
भस्मोद्धूलितसर्वाङ्ग भस्म दिव्यं ददामि ते ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - भस्मोद्धूलनं
समर्पयामि ॥

कुङ्कुमचूर्णम्
व्यासदत्त वरप्राप्त षोडशाब्दायुरुज्ज्वल ।
किङ्करीभूतभूपाल कुङ्कुमं ते ददाम्यहम् ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - कुङ्कुमचूर्णं
समर्पयामि ॥

रुद्राक्षमालिका
श्रीमन्मण्डनमिश्रादि वादकेळिविशारद ।
दुर्वादतूलवातूल भज रुद्राक्षमालिकाम् ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - रुद्राक्षमालिकां
समर्पयामि ॥

ॐ नमो॑ बि॒ल्मिने॑ च कव॒चिने॑ च॒ नमः॑ श्रु॒ताय॑ च
श्रुत॒सेना॑य च ॥

श्रीमन्मण्डनकर्णोक्त महावाक्यादिमन्त्रक ।
सुरेश्वराख्या सन्दायिन् बिल्वपत्रं ददामि ते ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - बिल्वपत्रं
समर्पयामि ॥

पुष्पमालिका
ॐ तस्मादश्वा अजायन्त । ये के चोभयादतः । गावो ह
जज्ञिरे तस्मात् । तस्माज्जाता अजावयः ।
सुरेश पद्मचरण हस्तामलक तोटकैः ।
अन्यैश्च शिष्यैः संवीत पुष्पमालां ददामि ते ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - पुष्पमालिकां
समर्पयामि ॥

॥ अथ पत्रपूजा ॥

ॐ शिवरूपाय नमः - बिल्वपत्रं समर्पयामि ।
ॐ शक्तिरूपाय नमः - कदम्बपत्रं समर्पयामि ।
ॐ विष्णुरूपाय नमः - तुलसीपत्रं समर्पयामि ।
ॐ लक्ष्मीरूपाय नमः - तामरसपत्रं समर्पयामि ।
ॐ ब्रह्मरूपाय नमः - दाडिमीपत्रं समर्पयामि ।
ॐ सरस्वतीरूपाय नमः - मल्लिकापत्रं समर्पयामि ।
ॐ गणपतिरूपाय नमः - दूर्वापत्रं समर्पयामि ।
ॐ षण्मुखरूपाय नमः - मरुवकपत्रं समर्पयामि ।
ॐ श्रीचक्र रूपाय नमः - अशोकपत्रं समर्पयामि ।
ॐ श्रीदक्षिणामूर्तिरूपाय नमः - नानाविध पत्राणि समर्पयामि
॥

॥ अथ पुष्पपूजा ॥

ॐ शिवरूपाय नमः - जातीपुष्पं समर्पयामि ।
ॐ शक्तिरूपाय नमः - कदम्बपुष्पं समर्पयामि ।
ॐ विष्णुरूपाय नमः - तुलसीपुष्पं समर्पयामि ।
ॐ लक्ष्मीरूपाय नमः - पद्मपुष्पं समर्पयामि ।
ॐ ब्रह्मरूपाय नमः - श्वेतकमलपुष्पं समर्पयामि ।
ॐ सरस्वतीरूपाय नमः - मल्लिकापुष्पं समर्पयामि ।
ॐ गणपतिरूपाय नमः - कल्हारपुष्पं समर्पयामि ।
ॐ षण्मुखरूपाय नमः - जपापुष्पं समर्पयामि ।

ॐ श्रीचक्र रूपाय नमः -अशोकपुष्पं समर्पयामि ।
ॐ श्रीदक्षिणामूर्तिरूपाय नमः -नानाविध पुष्पाणि
समर्पयामि ॥

॥ श्रीशङ्कराचार्याष्टोत्तरशतनामावलिः ॥

ॐ श्रीमत्कैलासनिलयशङ्कराय नमो नमः ।
ॐ ब्रह्मविद्याऽम्बिकाश्लिष्टवामाङ्गाय नमो नमः ।
ॐ ब्रह्मोपेन्द्रमहेन्द्रादिप्रार्थिताय नमो नमः ।
ॐ भक्तानुग्रहणैकान्तशान्तस्वान्ताय ते नमः ।
ॐ नास्तिकाक्रान्तवसुधा पालकाय नमो नमः ।
ॐ कर्मकाण्डावनस्कन्दप्रेषकाय नमो नमः ।
ॐ लोकानुग्रहणोपात्तनृदेहाय नमो नमः ।
ॐ कालटीक्षेत्रवासादिरसिकाय नमो नमः ।
ॐ पूर्णानदीतीरवासलोलुपाय नमो नमः ।
ॐ विद्याधिराजसद्वंशपावनाय नमो नमः ॥ १० ॥

ॐ आर्याम्बिकागर्भवासनिर्भराय नमो नमः ।
ॐ शिवगुर्वाप्तसुकृतसत्फलाय नमो नमः ।
ॐ आर्याशिवगुरुप्रीतिभाजनाय नमो नमः ।
ॐ ईश्वराब्धीयवैशाखपञ्चमीजन्मने नमः ।
ॐ निजावतारानुगुण शङ्कराख्याभृते नमः ।
ॐ नामसंख्यासमुन्नेयजन्मकालाय ते नमः ।
ॐ शङ्कराख्यासुविख्यातमङ्गलाय नमो नमः ।
ॐ पितृदत्तान्वर्थभूतनामधेयाय ते नमः ।
ॐ बाललीलातोषितस्वमातृकाय नमो नमः ।
ॐ प्रथमाब्दाभ्यस्तनानाभाषाढ्याय नमो नमः ॥ २० ॥

ॐ द्वितीयाब्दकृतस्वीयसच्चूडाकृतये नमः ।
ॐ निजताततवियोगार्तमात्राश्वासकृते नमः ।
ॐ मातृकारितसद्विप्रसम्स्काराय नमो नमः ।
ॐ पलाशदण्डमौञ्ज्यादिभासुराय नमो नमः ।
ॐ सन्ध्याग्निसेवानुष्ठाननिरताय नमो नमः ।
ॐ विद्यागुरुकुलैकान्तनिवासाय नमो नमः ।

ॐ विद्याग्रहणनैपुण्यविस्मापनकृते नमः ।
ॐ अभ्यस्यवेदवेदाङ्गसन्दोहाय नमो नमः ।
ॐ भिक्षाशनादिनियमपालकाय नमो नमः ।
ॐ विद्याविनयसम्पत्तिविख्याताय नमो नमः ॥ ३० ॥

ॐ भिक्षामलकसन्दातृसतीशोकहृते नमः ।
ॐ स्वर्णामलकसद्वृष्टिकारकाय नमो नमः ।
ॐ न्यायसांख्यादिशास्त्राब्धिमथनाय नमो नमः ।
ॐ जैमिनीयनयार्णोधिकर्णधाराय ते नमः ।
ॐ पातञ्जलनयारण्यपञ्चास्याय नमो नमः ।
ॐ मातृशुश्रूषणासक्तमानसाय नमो नमः ।
ॐ पूर्णासामीप्यसन्तुष्टमातृकाय नमो नमः ।
ॐ केरलेशकृतग्रन्थप्रेक्षकाय नमो नमः ।
ॐ दत्तराजोपहारादिनिराशाय नमो नमः ।
ॐ स्वावतारफलप्राप्तिनिरीक्षणकृते नमः ॥ ४० ॥

ॐ सन्यासग्रहणोपायचिन्तकाय नमो नमः ।
ॐ नक्रग्रहमिषावाप्तमात्राज्ञाय नमो नमः ।
ॐ प्रैषोच्चारणसंत्यक्तनक्रपीडाय ते नमः ।
ॐ अन्त्यकालस्वसानिध्यशम्सकाय नमो नमः ।
ॐ गोविन्दभगवत्पादान्वेषकाय नमो नमः ।
ॐ गोविन्दशिष्यताप्राप्तिप्रशम्सनकृते नमः ।
ॐ आर्यपादमुखावाप्तब्रह्मविद्याय ते नमः ।
ॐ नर्मदातटिनीतीरस्तम्भकाय नमो नमः ।
ॐ गुर्वनुज्ञातविश्वेशदर्शनाय नमो नमः ।
ॐ वाराणसीविश्वनाथक्षेत्रगाय नमो नमः ॥ ५० ॥

ॐ चण्डालाकृतिविश्वेशवादसंश्राविणे नमः ।
ॐ मनीषापञ्चकस्तोत्रश्रावकाय नमो नमः ।
ॐ साक्षात्कृतमहादेवस्वरूपाय नमो नमः ।
ॐ गुरुविश्वेश्वराज्ञाप्तभाष्यग्रन्थकृते नमः ।
ॐ नानाभाष्यप्रकरणस्तोत्रजातकृते नमः ।
ॐ देवतागुरुविप्रादिभक्तिसंधुक्षिणे नमः ।
ॐ भाष्याद्यध्यापनासक्तमानसाय नमो नमः ।

ॐ आनन्दादिशिष्यौघसंवृताय नमो नमः ।
ॐ पद्मपादाभिधालाभहृष्टशिष्याय ते नमः ।
ॐ आचार्यभक्तिमाहात्म्यनिदर्शनकृते नमः ॥ ६० ॥

ॐ वृद्धव्यासपरामृष्टभाष्यार्थाय नमो नमः ।
ॐ व्यासप्रशंसिताशेषभाष्यजाताय ते नमः ।
ॐ तत्तत्प्रश्नोत्तरश्रोतृव्यासप्रीतिकृते नमः ।
ॐ नारायणावतारत्वस्मारकाय नमो नमः ।
ॐ वेदव्यासवरप्राप्तषोडशाब्दायुषे नमः ।
ॐ कुमारिलजयाशम्साशम्सकाय नमो नमः ।
ॐ तुषाग्निस्थितभट्टोक्तिश्लाघकाय नमो नमः ।
ॐ सुब्रह्मण्यावतारश्रीभट्टनुग्राहिणे नमो नमः ।
ॐ मण्डनाख्यमहासूरिविजयाशम्सिने नमः ।
ॐ माहिष्मतीपुरोपान्तपावनाय नमो नमः ॥ ७० ॥

ॐ शुकसूचिततद्गेहदर्शकाय नमो नमः ।
ॐ वादभिक्षापेक्षणादिस्वाशयोद्घाटिने नमः ।
ॐ व्यासजैमिनिसानिध्यवावदूकाय ते नमः ।
ॐ मण्डनीयप्रश्नजातोत्तरदात्रे  नमो नमः ।
ॐ मध्यस्थभारतीवाक्यप्रमाणाय नमो नमः ।
ॐ मालामालिन्यनिर्विण्णमण्डनार्यजिते नमः ।
ॐ प्रवृत्तिमार्गपारम्यवारकाय नमो नमः ।
ॐ कर्मकाण्डीयतात्पर्योद्धारकाय नमो नमः ।
ॐ ज्ञानकाण्डप्रमाणत्वसमर्थनकृते नमः ।
ॐ युक्तिसाहस्रतोऽद्वैतसाधकाय नमो नमः ॥ ८० ॥

ॐ जीवब्रह्मैक्यसिद्धान्तसंस्थापनकृते नमः ।
ॐ निजापजयनिर्विण्णमण्डनेड्यपदे नमः ।
ॐ सन्यासकृन्मण्डनानुग्राहकाय  नमो नमः ।
ॐ महावाक्योपदेशादिदायकाय नमो नमः ।
ॐ सुरेश्वराभिधाजुष्टशिष्यानुग्राहिणे नमः ।
ॐ वनदुर्गामन्त्रबद्धभारतीवपुषे नमः ।
ॐ शृङ्गाद्रिक्षेत्रसानिध्यप्रार्थकाय नमो नमः ।
ॐ श्रीशारदादिव्यमूर्तिस्थापकाय नमो नमः ।

ॐ शृङ्गाद्रिशारदपीठसंस्थापनकृते नमः ।
ॐ द्वादशाब्दनिजावासपूतशृङ्गाद्रये नमः ॥ ९० ॥

ॐ प्रत्यहं भाष्यपाठादिकालक्षेपकृते नमः ।
ॐ अन्त्यकालस्मृतिप्राप्तमातृपार्श्वाय ते नमः ।
ॐ मातृसंस्कारनिर्व्यूढप्रतिज्ञाय नमो नमः ।
ॐ पद्मपादीसमुद्धारप्रीतपद्माङ्घ्रये नमः ।
ॐ स्ववधोद्युक्तकापालिकोपेक्षणकृते नमः ।
ॐ स्वशिष्यमारितस्वीयमारकाय नमो नमः ।
ॐ परकायप्रवेशादियोगसिद्धिमते नमः ।
ॐ लक्ष्मीनृसिंहकरुणाशान्तदेहाधये नमः ।
ॐ गोकर्णनाथमूकाम्बासन्दर्शनकृते नमः ।
ॐ मृतपुत्रोज्जीवनादिमहाश्चर्यकृते नमः ॥ १०० ॥

ॐ मूकबालकसम्भाषाद्यमानुषकृते नमः ।
ॐ हस्तामलकनामाढ्यशिष्योपेताय ते नमः ।
ॐ चतुर्दिक्चतुराम्नायस्थापकाय नमो नमः ।
ॐ तोटकाभिधसच्छिष्यसंग्रहाय नमो नमः ।
ॐ हस्ततोटकपद्मांघ्रिसुरेशाराध्य ते नमः ।
ॐ काश्मीरगतसर्वज्ञपीठगाय नमो नमः ।
ॐ केदारान्तर्धिकैलासप्राप्तिकर्त्रे नमो नमः ।
ॐ कैलासाचलसंवासिपार्वतीशाय ते नमः ।
ॐ मङ्गलौघलसत्सर्वमङ्गलापतये नमः ॥ १०८ ॥

धूपम्

ॐ यत्पुरु॑षं॒ व्य॑दधुः । क॒ति॒धा व्य॑कल्पयन् । मुखं॒
किम॑स्य॒ कौ बा॒हू । का॒वूरू पादा॑वुच्येते ।
ॐ धूर॑सि॒ धूर्व॒ धूर्व॑न्तं॒ धूर्व॒तं यो᳚ऽस्मान्
धू॑र्वति॒तं धू᳚र्व॒यं व॒यं धू॑र्वा॒मस्त्वं
दे॒वाना॑मसि॒। सस्नि॑तमं॒ पप्रि॑तमं॒ जुष्ट॑तमं॒
वह्नि॑तमं दे॒वहू॑तम॒मह्रु॑तमसि हवि॒र्धानं॒
दृꣳह॑स्व॒ माह्वा᳚र्मि॒त्रस्य॑ त्वा॒ चक्षु॑षा॒ प्रेक्षे॒
माभेर्मा संवि॑क्था॒ मा त्वा॑ हिꣳसिषम् ॥

सर्वज्ञपीठिकारोहसमुत्सुकितमानस ।
सर्वज्ञमूर्ते सर्वात्मन् धूपमाजिघ्र सादरम् ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - धूपमाघ्रापयामि ॥

दीपम्
ॐ ब्राह्मणोऽस्य मुखमासीत् । बाहू राजन्यः
कृतः । ऊरू तदस्य यद्वैश्यः । पद्भ्याँ शूद्रो
अजायत ॥

उद्दीप्यस्व जातवेदोऽपघ्नन्निर्ऋतिं मम ।
पशूँश्च मह्यमावह जीवनं च दिशो दिश ।
मानो हिँसीज्ञातवेदो गामश्वं पुरुषं जगत् ।
अबिभ्रदग्न आगहि श्रिया मा परिपातय ॥

सरस्वतीकृतप्रश्नोत्तरदानविचक्षण ।
शृङ्गाद्रिस्थानतत्संस्थाकारिन् दीपं गृहाण भोः ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - दीपं दर्शयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - धूपदीपानन्तरं
आचमनीयमाचमनीयं समर्पयामि ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - आचमनानन्तरं
परिमलपत्रपुष्पाणि समर्पयामि ॥

नैवेद्यम्
[नैवेद्यपदार्थान् गायत्र्या प्रोक्ष्य]
ॐ भूर्भुवस्सुवः तत्सवितुर्वरेण्यं भर्गो देवस्य
धीमहि धियो यो नः प्रचोदयात् ॥

सत्यं त्वर्तेन परिषिञ्चामि ॥

कामधेनुं स्मरामि [धेनुमुद्रां प्रदर्श्य]
अमृतमस्तु । अमृतोपस्तरणमसि ॥

ॐ प्राणाय स्वाहा ।
ॐ अपानाय स्वाहा ।
ॐ व्यानाय स्वाहा ।
ॐ उदानाय स्वाहा ।
ॐ समानाय स्वाहा ।
ॐ ब्रह्मणे स्वाहा ॥

ॐ चन्द्रमा मनसो जातः । चक्षोस्सूर्यो अजायत ।
मुखादिन्द्रश्चाग्निश्च । प्राणाद्वायुरजायत ।
षण्मतस्थापनाचार्य षड्दर्शनविशारद ।
गृहाण षड्रसोपेतं भक्ष्यभोज्यादिकं प्रभो ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - नैवेद्यं
समर्पयामि ॥

सर्वदिक् चतुराम्नायव्यवस्थापक शङ्कर ।
सर्वलोकैकसम्पूज्य पानीयं प्रतिगृह्यताम् ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - मध्ये मध्ये
अमृतपानीयं समर्पयामि ॥

अमृतापिधानमसि - उत्तरापोशनं समर्पयामि ।
श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - हस्तप्रक्षाळनं
समर्पयामि । गण्डूषं समर्पयामि । पादप्रक्षाळनं समर्पयामि ।
आचमनीयमाचम्नीयं समर्पयामि । करोद्वर्तनं समर्पयामि ॥

ताम्बूलम्
ॐ नाभ्या आसीदन्तरिक्षम् । शीर्ष्णो द्यौस्समवर्तत ।
पद्भ्यां भूमिर्दिशः श्रोत्रात् । तथा लोकाँ
अकल्पयन् ॥

सर्वलोकसुविख्यात यशोराशिनिशाकर ।
सर्वात्मभूत सुगुरो ताम्बूलं प्रददामि ते ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - पूगीफल
ताम्बूलं समर्पयामि ॥

मङ्गलनीराजनम्
ॐ वेदाहमेतं पुरुषं महान्तम् । आदित्यवर्णं
तमसस्तु पारे। सर्वाणि रूपाणि विचित्य धीरः ।
नामानि कृत्वाऽभिवदन् यदास्ते॥
सोमो वा एतस्य राज्यमादत्ते । यो राजा सन्राज्यो वा
सोमेन यजते । देवसुवामेतानि हवीꣳषि
भवन्ति । एतावन्तो वै देवानाꣳसवाः । त
एवास्मै सवान् प्रयच्छन्ति । त एनं पुनस्सुवन्ते
राज्याय । देवसू राजा भवति ॥
साम्राज्यं भोज्यं स्वाराज्यं वैराज्यं पारमेष्ठिकं राज्यं
महाराज्यमाधिपत्यम् ॥
न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति
कुतोऽयमग्निः ।
तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं
विभाति ॥
प्रस्थानत्रयीभाष्यनिर्माणैक विशारद ।
अज्ञानतिमिरोत्सारिन् पश्य नीराजनप्रभाम् ॥
श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः -
दिव्यमङ्गलनीराजनं दर्शयामि ॥
श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - नीराजनानन्तरं
आचमनीयमाचमनीयं समर्पयामि । आचमनानन्तरं
परिमलपत्रपुष्पाणि समर्पयामि ॥
रक्षाधारणम्
ॐ बृहत् साम क्षत्रभृद्वृद्धवृष्णियं
त्रिष्टुभौजश्शुभितमुग्रवीरम् । इन्द्रस्तोमेन
पञ्चदशेन मध्यमिदं वातेन सगरेण रक्ष ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - रक्षां धारयामि
॥

मन्त्रपुष्पम्
ॐ धाता पुरस्ताद्यमुदाजहार । शक्रः प्रविद्वान्
प्रदिशश्चतस्रः । तमेवं विद्वानमृत इह
भवति । नान्यः पन्था अयनाय विद्यते ॥

राजाधिराजाय प्रसह्यसाहिने । नमो वयं
वैश्रवणाय कुर्महे । स मे कामान् कामकामाय
मह्यम् । कामेश्वरो वैश्रवणो ददातु । कुबेराय
वैश्रवणाय । महाराजाय नमः ॥

श्रीविद्यादिमहामन्त्रमाहात्म्यपरिदर्शक ।
मन्त्रसारज्ञ भगवन् मन्त्रपुष्पं ददामि ते ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - मन्त्रपुष्पं
समर्पयामि ॥

प्रदक्षिणा
ॐ यज्ञेन यज्ञमयजन्त देवाः । तानि धर्माणि
प्रथमान्यासन् । ते ह नाकं महिमानस्सचन्ते । यत्र
पूर्वे साध्यास्सन्ति देवाः ॥

प्रदक्षिणीकृताशेष भारताजिर शङ्कर ।
प्रदक्षिणं करोमि त्वां प्रसन्नवदनाम्बुज ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - अनन्तकोटि
प्रदक्षिणनमस्कारान् समर्पयामि ॥

प्रसन्नार्घ्यम्
ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि तन्नो रुद्रः
प्रचोदयात् ॥

प्रसन्नहृदयाम्भोज प्रपन्नार्तिप्रभञ्जन ।
प्रकृष्टज्ञानमाहात्म्य प्रसन्नार्घ्यं ददामि ते ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः -
इदमर्घ्यमिदमर्घ्यमिदमर्घ्यम् ॥

प्रार्थना
अनेकजन्मसम्प्राप्त कर्मबन्धविदाहिने ।
आत्मज्ञानप्रदानेन तस्मै श्रीगुरवे नमः ॥

ज्ञानं देहि यशो देहि विवेकं बुद्धिमेव च ।
वैराग्यं च शिवां विद्यां निर्मलां भक्तिमन्वहम् ॥

अद्वैतसारसर्वस्व संग्रहोत्सुकमानस ।
शिष्योपदेशप्रणयिन् प्रार्थनां ते समर्पये ॥

श्रीशङ्करभगवत्पादाचार्यस्वामिने नमः - प्रार्थयामि ॥

पुनः पूजा
छत्रं धारयामि - चामरं वीजयामि - गीतं श्रावयामि -
वाद्यं घोषयामि - नृत्तं दर्शयामि - आन्दोलिकामारोपयामि -
अश्वमारोपयामि - गजमारोपयामि - रथमारोपयामि -
ध्वजारोहणं समर्पयामि ॥

श्रीपूर्णातटिनीतरङ्गपटली पूरोदरोदित्वर
स्फीतांभःकण शीतलानिल परिस्पन्दाधिकानन्दित ।
कालट्याख्य पुरोल्लसच्छिवगुरुस्थान प्रदीपाङ्कुर
श्रीमच्छङ्करदेशिकोत्तम विभो ऋग्वेदमाकर्णय ॥

श्रीमत्कैलासाचलकृताधिवास श्रीपतिप्रमुखसुरवर प्रार्थित
भूलोकवास ऋग्वेदप्रिय ऋग्वेदमवधारय ।
ॐ अ॒ग्निमी᳚ळे पु॒रोहि॑तं य॒ज्ञस्य॑ दे॒वमृ॒त्विज᳚म् ।
होता᳚रं रत्न॒धात॑मम् ॥

कल्यातङ्क निरङ्कुशस्य जगतः कल्याणसन्दायक
ब्रह्मेन्द्रादि समस्तदेव निकुरुम्भाभ्यर्थना साधक ।
श्रीमत्कालटिपुण्यभूपरिसर प्राप्तावतारोज्ज्वल
विद्याराजकुलाब्धिचन्दिर यजुर्वेदं त्वमाकर्णय ॥

समाश्रित वृषाचलेश्वर स्वयम्भूलिङ्ग समादृत स्वाश्रित
भक्तजन प्रार्थनापूरण व्यतिषङ्ग यजुर्वेदप्रिय

यजुर्वेदमवधारय ।
ॐ त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।
उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय
माऽमृतात् ॥

आर्याम्बा मुखपङ्कजार्क शिवगुर्वानन्दसन्दोहन
स्वाचार्याधिगताखिल श्रुतितते सच्छास्त्रपारङ्गत ।
ग्राहग्रासमिषात् स्वमातृकृतसन्यासाभ्यनुज्ञानुग
श्रीमच्छङ्कर सामवेदमधुना सानन्दमाकर्णय ॥

सफलीकृतार्याम्बाशिवगुरु मनोरथ
विशदीकृतात्मविद्याविचार विकलीकृतमन्मथ सामवेदप्रिय
सामवेदमवधारय ।
ॐ अग्न आयाहि वीतये गृणानो हव्यदातये । नि होता
सत्सि बर्हिषि ॥

श्रीगोविन्दमुखोद्गत श्रुतिशिरोवाक्योपदेशादृत
श्रीविश्वेश्वर दर्शनोत्सुक विभो काशीनिवासप्रिय ।
सम्सारार्तसनन्दनादिकृतिनां सन्यासदीक्षागुरो
सामोदं त्वमथर्ववेदमधुना स्वामिन् समाकर्णय ॥

ॐ शं नो देवीरभिष्टय आपो भवन्तु पीतये । शं
यो रभिस्रवन्तु नः ॥

गीतावाक्य ततेर्दशोपनिषदां श्रीव्याससूत्रावलेः
प्रस्थानत्रितयस्य निस्तुल महाभाष्यप्रणेतः प्रभो ।
वाराणस्युपसन्न शिष्यजनताभाष्योपदेशोत्सुक
स्वाधीनीकृत सर्वशास्त्रवितते शास्त्रं समाकर्णय ॥

निजपादाम्सु परिपावित कालटीक्षेत्र निजपुण्यावतार
परिष्कृतात्रेयगोत्र शास्त्रार्थप्रिय शास्त्रमवधारय ।
ॐ अथातो दर्शपूर्णमासौ व्याख्यास्यामः । प्रातरग्निहोत्रं हुत्वा
अन्यमाहवनीयं प्रणीय अग्नीनन्वादधाति ॥

वृद्धब्राह्मण बादरायणकृतप्रश्नोत्तरात्युत्सुक
सूत्रौघ स्वरसार्थ वर्णन सुसंतुष्यन्मुनिश्लाघित ।

व्यासाज्ञावशतः स्वभाष्य विशदीकार प्रचारोद्यत
शुद्धाद्वैतमतप्रसारणपटो प्रीत्या पुराणं श‍ृणु ॥

स्वमहिम सम्प्रापित सौवर्णवर्ष समुत्पादित
दीनतरद्विजसतीहर्ष पुराणपठनप्रिय पुराणमवधारय ।
ॐ परित्राणाय साधूनां विनाशाय च दुष्कृतां ।
धर्मसंस्थापनार्थाय सम्भवामि युगे युगे ॥

क्षमाप्रार्थना
आवाहनं न जानामि न जानामि विसर्जनम् ।
पुजाविधिं न जानामि क्षमस्व गुरुसत्तम ॥

अन्यथा शरणं नास्ति त्वमेव शरणं मम ।
तस्मात्कारुण्यभावेन रक्ष रक्ष जगद्गुरो ॥

अपराधसहस्राणि क्रियन्तेऽहर्निशं मया ।
दासोऽयमिति मां मत्वा क्षमस्व गुरुपुङ्गव ॥

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतेः
स्वभावात् ।
करोमि यद्यत्सकलं परस्मै श्रीशङ्करायेति समर्पयामि ॥

हृत्पद्मकर्णिकामध्यं स्वशिष्यैः सह शङ्कर ।
प्रविश त्वं महादेव सर्वलोकैकनायक ॥

[इति निर्माल्यमाघ्राय स्तोत्रादिकं पठेत्]
यस्य स्मृत्या च नामोक्त्या तपः पूजा कृयादिषु ।
न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥

मन्त्रहीनं क्रियाहीनं भक्तिहीनं जगद्गुरो ।
यत्पूजितं मया देव परिपूर्णं तदस्तु मे ॥

अनेन मया कृत पूजया श्रीशङ्करभगवत्पादाचार्यः
प्रीयताम् ॥

मध्ये मन्त्र तन्त्र स्वर वर्ण ध्यान नियम न्यूनातिरिक्त लोपदोष
प्रायश्चित्तार्थं नामत्रयजपमहं करिष्ये ॥

ॐ अच्युताय नमः ॐ अनन्ताय नमः ॐ गोविन्दाय नमः [त्रिः]

ॐ अच्युतानन्तगोविन्देभ्यो नमो नमः ॥

प्रायश्चित्तान्यशेषाणि तपःकर्मात्मकानि वै ।
यानि तेषामशेषाणां कृष्णानुस्मरणं परम् ॥

श्रीकृष्ण-कृष्ण-कृष्ण
ॐ हर ॐ हर ॐ हर
॥ श्रीमहात्रिपुरसुन्दरी चरणारविन्दार्पणमस्तु ॥

Compiled and encoded by Harsha Ramamurthy

(harsha_ramamurthy at mail.com)

.. AdishankarAchAryapUjAvidhI ..

was typeset on August 12, 2016

Please send corrections to *sanskrit@cheerful.com*